# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा, एप्रिल-२०१६

**कक्षा - शास्त्री-२ ( Sem_4 )** **प्रश्नपत्र-८** **गुणाः - ७०**

**विषयः - पुराणेतिहासः** CE 2.4.8 **समयः - ०३:०० तः ०६:००**

**दिनाङ्कः - २६-०४-२०१६** **सन्दर्भग्रन्थः - महाभारते मोक्षधर्मपर्व**

---

### युनिट-१

**प्रश्नः -१ कयोश्चिद् द्वयोः ससन्दर्भं विवेचनं कुरुत ।** ०८

*(१) यथा काष्ठं च काण्ठं च समेयातां महोदधौ ।*
*समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥*

*(२) नास्ति विद्या समं चक्षुः नास्ति सत्यसमं तपः ।*
*नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम् ॥*

*(३) यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।*
*तथा पूर्वकृतं कर्म कर्तारमनुगच्छति ॥*

**प्रश्नः -२ प्रह्लादावधूतसंवादविवेचनं कुरुत ।** ०८

**अथवा**

**जनकस्योक्तिविवेचनं कृत्वा बोध्यगीतां विवेचयत ।**

**प्रश्नः -३ द्वयोः टिप्पणी कार्या ।** ०४

*(१) ब्राह्मणेन्द्रसंवादः ।* *(२) भरद्वाजभृगुसंवादः ।*

*(३) मङ्किगीता ।* *(४) सेनजिद्-ब्राह्मणसंवादः ।*

**प्रश्नः -४ अधोलिखितेषु पञ्चानामुत्तराणि लिखत ।** ०५

*(१) इन्द्रः केन रूपेण आगतः ?*

*(२) "सैकतसतेवः" इत्यस्य कोऽर्थः ?*

*(३) पिङ्गला का अवर्तत ?*

*(४) गाधोदकेमत्स्यः कथं जीवति ?*

*(५) शम्पाकः क आसीत् ?*

*(६) मङ्किः कः अवर्तत ?*

*(७) आशा कीदृशी नैराश्यञ्च किम् ?*

### युनिट-२

**प्रश्नः -५ कयोश्चिद् द्वयोः ससन्दर्भं सप्रसङ्गं व्याख्या कुरुत ।** ०८

*(१) अतिथि र्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।*
*स दत्त्वा दुष्कृतं तस्मै पुण्यमादाय गच्छति ॥*

*(२) आर्द्रपाणि: समुत्तिष्ठेन्नार्द्रपाद: स्वपेन्निशि ।*
*देवर्षिर्नारद: प्राह एतदाचारलक्षणम् ॥*
*(३) गुरुभ्य आसनं देयं कर्तव्यं चाभिवादनम् ।*
*गुरूनभ्यर्च्य युज्यन्ते आयुषा यशसा श्रिया ॥*

**प्रश्न: -६ शिष्टाचारणवर्णनं कृत्वा पापनिन्दां धर्मप्रशंसां प्रतिपादयत । ०८**

**अथवा**

**आश्रमधर्मान् सविस्तरं विवेचयत ।**

**प्रश्न: -७ चत्वारि लघूत्तराणि दीयन्ताम् । ०४**

*(१) क: प्रथम: आश्रम: ?*
*(२) "श्रोत्रसुखा गिर:" नाम किम् ?*
*(३) "उच्छवृत्ति:" नाम किम् ?*
*(४) "स्तेयम्" नाम किम् ?*
*(५) "पञ्चार्द्र:" नाम किम् ?*
*(६) ब्राह्मणोच्छिष्टं भोजनं कीदृशं प्रोक्तम् ?*

**युनिट-३**

**प्रश्न: -८ पद्यद्वयस्य सन्दर्भसहितां व्याख्यां कुरुत । ०८**

*(१) रागेण जापको जप्यं कुरुते तत्र मोहित: ।*
*यत्रास्य राग: पतति तत्र तत्रोपपद्यते ॥*
*(२) सत्यमेकाक्षरं ब्रह्म सत्यमेकाक्षरं तप: ।*
*सत्यमेकाक्षरो यज्ञ: सत्यमेकाक्षरं श्रुतम् ॥*
*(३) यथा चन्द्रो ह्यमावास्यामलिङ्गत्वान्न दृश्यते ।*
*न च नाशोऽस्य भवति तथा विद्धि शरीरिणम् ॥*

**प्रश्न: -९ आत्मनो नित्यसत्तां सविस्तरं प्रतिपादयत । ०८**

**अथवा**

**जापकेक्ष्वाकुकथावर्णनं कुरुत ।**

**प्रश्न: -१० टिप्पणीद्वयं लिखत । ०४**

*(१) ब्रह्मप्राप्ते: उपाया: ।*
*(२) बृहस्पतिमनुसंवाद: ।*
*(३) सत्यमहिमा ।*
*(४) जपयज्ञ: ।*

**प्रश्न: -११ पञ्चानां लघूत्तराणि लिखत । ०५**

*(१) मोक्षधर्मपर्व कस्मिन् पर्वणि वर्तते ?*
*(२) कृष्णद्वैपायनो नाम क: ?*
*(३) ध्यानयोग: कतिविध: ?*
*(४) बाहुजीविन: के प्रोक्ता: ?*
*(५) वाग्वज्रा: के प्रोक्ता: ?*
*(६) केषां वाग्युद्धं तीव्रं भवति ?*
*(७) यम: कस्य पुत्र: ?*

---------------------